Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 7

VU–94–Sans. Vangmay

# वरिष्ठ उपाध्याय परीक्षा, 2017

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) शिवराजविजयस्य रचनाकारः कः ? [1]

2) चातकस्य तृष्णां कः शमयति ? [1]

3) पुण्यनगरे शिववीरा ध्युषितचरे महाप्रासादे सपरिवारः सम्प्रति कः प्रतिवसति ? [1]

4) चित्राङ्गदः कस्य दुर्गस्य निर्माणमकरोत् ? [1]

5) वीरभूमिकाव्यस्य रचनाकारः कोऽस्ति ? [1]

6) वीरभूमिकाव्ये कस्य वर्णनम् अस्ति ? [1]

7) मत्याकारः चित्रकूटः कं वंशम् अरक्षत् ? [1]

8) 'अचोयत्' इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

9) ''चार्थे द्वन्द्वः'' इति सूत्रस्य व्याख्या कार्या। [3]

10) शिवराजविजयस्य काव्य सौन्दर्य वर्णनं कुरूत। [3]

11) वीरभूमि काव्यस्य रचनाकर्तुः परिचयो देयः। [3]

12) निम्नलिखित श्लोकयोः एकस्य सप्रसंग व्याख्या कार्या – [1+3=4]

क) आलोकिता वसुमती सकलापि किन्तु,

नालोकितः सुरूचिरो यदि मेदपाटः।

क्लिष्टं मुधा, सफलता तु विलोचनस्य,

श्रीमेदपाटवसुधा सुषमावलोकात्।।

ख) अत्रैव मोकलधराधिपतेः प्रपौत्रो,

व्याघ्रो बहादुर – चमूप – मृगान्निहत्य।

दत्त्वाऽरिमूर्धसु पदं दिवमारूरोह,

प्रोद्गीयमानचरितः सुरसुन्दरीभिः।।

13) निम्नलिखित श्लोकयोः एकस्य सप्रसंग भावार्थोलेख्यः – [1+3=4]

क) अत्रैव माधवपदाब्जसुधाप्रमत्ता,

मीराँ ननर्त गलितस्पराभिमाना।

घोरं हलाहलमिहैव तदीय–हस्ते,

श्री नन्दसूनुचरणामृततां प्रप्रेदे।।

ख) श्री कुम्भकर्ण नरनाथविनिर्मितेऽस्मि,

न्नायाहि पापकदने सदने मुरारेः।

भक्त्या नतं सकृदपीह यदुत्तमाङ्गम्,

नित्योन्नतं भवति तज्जगतां त्रयेऽपि।।

14) अधोलिखितेषु पञ्च वाक्यानां संस्कृत भाषायामनुवादो विधेयः – [5×1=5]

i) विद्यालय के दोनों ओर वन हैं।

ii) दिनेश भाई के साथ नगर गया।

iii) प्राचीनकाल में सब लोग संस्कृत पढ़ते थे।

iv) बालक को धन दो।

v) वह महल से गिरा।

vi) आचरण परम धर्म है।

vii) विद्यालय में 15 अध्यापक हैं।

viii) कवियों में कालिदास श्रेष्ठ है।

15) अधोलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य 200 शब्देषु निबन्धो लेख्य:। [5]

i) विद्याधनं सर्वधनप्रधानम्

ii) मम प्रिय कवि:

iii) भ्रष्टाचार:

iv) संस्कृत भाषाया: महत्त्वम्

16) निम्नलिखितेषु पञ्चपदानां सङ्घटनां विधाय वाक्येष्वपि प्रयोगं कुरुत – [5×1=5]

i) दृश् + तुमुन्

ii) किम् + तसिल्

iii) प्रियं वदति इति

iv) राज्ञ:पुरूष:

v) हरे: सादृश्यम्

vi) छिद् + क्त

vii) न + अश्व:

viii) उपगोरपत्यम्

17) निम्नाङ्कितेषु गद्यांशेषु कयोश्चिद् द्वयो: सप्रसङ्ग व्याख्या विधेया – [2×4½ = 9]

क) चिराय दिल्ली – वल्लभ – पाणिपल्लव – तल्लज – च्छाया – मध्युषितोऽस्मि। परं वयं कवय: कस्यापि राजत्वं वा प्रतापित्वं वा आढ्यत्वं वा नापेक्षामहे, न वा कस्यापि साभिमान – भ्रूभङ्गम् उत्तुङ्ग कोपाञ्चिताखर्व – गर्व बर्बरतां वा सहामहे। न तस्य तादृशं भू – वलये राज्यं यादृश मस्माकं सारस्वत सृष्टौ। तस्य क्रीतदासा अपि न तदीहा – समकालमेव बद्धक़र – सम्पुटा यथोचिता वस्थाना: पुरोऽवतिष्ठन्ते, यथाऽस्माकं पदानि वाक्यानि छन्दांसि अलंकारा रीतयो गुणा रसाश्च।

ख) प्रातरेव च नित्य – नियमान्निर्वर्त्य स्वेष्ट – जन – सहित: सभासंस्थ एव स्वभृत्येन भूषण – कविमाकारयत्। सतु बद्धमहोष्णीष:, पादाग्र–पटर्यन्त – विलम्बमान – कञ्चुक:, नारिकेल – फल – सार – सहितं यज्ञोपवीत–युगलं हस्ते आदधान: द्वारपाल–दर्शितेन पथा सभां प्रविश्य ''विजयतां महाराज:'' इति सिंहगर्ज्जनम् – वधीरयता स्वरेणोच्चैरूच्चार्य स्वोपहारं महाराज हस्ते आर्पयत्।

ग) महाराजस्तु ''साधु साधु'' इति व्याहृत्य, पुन: पठितुमाज्ञप्तवान्। पठितवति च तस्मिन् सर्वेषु प्रसन्नेषु पुनरण्यादिशत्। इत्येवं विंशतिवारं तेन सा ब्रज – भाषामयी 'कवित्वकाम' नामिका वृत्तिरपाठि। महाराजेन च तस्मै गजानां विंशतिर्वित्तीर्णा – इत्यद्यापि प्रसिद्धं कविता – रसिकानां मण्डले। तदेव च दिनमारभ्य तेन भूषण–कवि: स्व–सभायां संस्थापित:।

घ) अथ दृश्यतां तत: शास्तिखानस्य काऽवस्थेति। अस्तमिते भगवति मरीचिमालिनी अन्धकारेण व्याप्तासु हरित्सु किञ्चित् किञ्चिच्चमत्कुर्वत्सु नक्षत्रेषु, शिववीरेणाध्युषितचरस्य महाप्रसादस्याट्टालिकायामात्मीयै: शास्तिखान: समुपविष्टोऽस्ति। परितश्चानेके योद्धारो मौद्गला: पर्यवातिष्ठन्त। परितो दीपमाला चकास्ति। पुष्पवाटिकाभ्यश्च प्रस्फुटदतिमुक्त – कुसुमसौरभ–मादाय धीर:समीर: प्रवहति।

18) एधितव्यम्, दानीयः, शिष्यः, कुम्भकारः, जनमेजयः, शीर्णः, विद्वान्, पवित्रम् एषु पञ्च प्रयोगाः साधनीयाः।
**[5 × 2 = 10]**

19) अधिहरि, उपराजम्, हरित्रातः, अतिमालः, अहोरात्रः, द्विरात्रम् कण्ठेकालः, व्यूढोरस्कः एषु पञ्च प्रयोगाः साधनीयाः।
**[5×2=10]**

20) आदित्य, रैवतिकः, क्षत्रियः, वैयाकरणः, शिक्षकः, राष्ट्रीयः हास्तिकः, नाव्यम् एषु पञ्च प्रयोगाः साधनीयाः।
**[5×2=10]**

DO NOT WRITE ANYTHING HERE